শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ চতুঃষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ চতুঃষষ্টিতমঃ সর্গঃ ॥

**সমুদ্রস্য ৱিশালতামালোক্য ৱিষীদতো ৱানরান্ সান্ত্বযিৎৱাঙ্গদস্য তান্ প্রতি পৃথক্ পৃথক্ সমুদ্রলঙ্ঘনশক্তিৱিষযকঃ প্রশ্নঃ**

আখ্যাতা গৃধ্ররাজেন সমুৎপ্লুত্য প্লৱঙ্গমাঃ।
সঙ্গতাঃ প্রীতিসংযুক্তা ৱিনেদুঃ সিংহৱিক্রমাঃ॥ **4.64.1** ॥

সম্পাতের্ৱচনং শ্রুৎৱা হরযো রাৱণক্ষযম্।
হৃষ্টাঃ সাগরমাজগ্মুঃ সীতাদর্শনকাঙ্ক্ষিণঃ॥ **4.64.2** ॥

অভিগম্য তু তং দেশং দদৃশুর্ভীমৱিক্রমাঃ।
কৃৎস্নং লোকস্য মহতঃ প্রতিবিম্বমৱস্থিতম্॥ **4.64.3** ॥

দক্ষিণস্য সমুদ্রস্য সমাসাদ্যোত্তরাং দিশম্।
সন্নিৱেশং ততশ্চক্রুর্হরিৱীরা মহাবলাঃ॥ **4.64.4** ॥

প্রসুপ্তমিৱ চান্যত্র ক্রীডন্তমিৱ চান্যতঃ।
ক্ৱচিৎ পর্ৱতমাত্রৈশ্চ জলরাশিভিরাৱৃতম্॥ **4.64.5** ॥

সঙ্কুলং দানৱেন্দ্রৈশ্চ পাতালতলৱাসিভিঃ।
রোমহর্ষকরং দৃষ্টৱা ৱিষেদুঃ কপিকুঞ্জরাঃ॥ **4.64.6** ॥

আকাশমিৱ দুষ্পারং সাগরং প্রেক্ষ্য ৱানরাঃ।
ৱিষেদুঃ সহিতাঃ সর্ৱে কথং কার্যমিতি ব্রুৱন্॥ **4.64.7** ॥

ৱিষণ্ণাং ৱাহিনীং দৃষ্টৱা সাগরস্য নিরীক্ষণাৎ।
আশ্ৱাসযামাস হরীন্ ভযার্তান্ হরিসত্তমঃ ॥ **4.64.8** ॥

ন ৱিষাদে মনঃ কার্যং ৱিষাদো দোষৱত্তরঃ।
ৱিষাদো হন্তি পুরুষং বালং ক্রুদ্ধ ইৱোরগঃ ॥ **4.64.9** ॥

যো ৱিষাদং প্রসহতে ৱিক্রমে সমুপস্থিতে।
তেজসা তস্য হীনস্য পুরুষার্থো ন সিদ্ধ্যতি ॥ **4.64.10** ॥

তস্যাং রাত্র্যাং ৱ্যতীতাযামঙ্গদো ৱানরৈঃ সহ।
হরিৱৃদ্ধৈঃ সমাগম্য পুনর্মন্ত্রমমন্ত্রযৎ ॥ **4.64.11** ॥

সা ৱানরাণাং ধ্ৱজিনী পরিৱার্যাঙ্গদং বভৌ।
ৱাসৱং পরিৱার্যেৱ মরুতাং ৱাহিনী স্থিতা ॥ **4.64.12** ॥

কোঽন্যস্তাং ৱানরীং সেনাং শক্তঃ স্তম্ভযিতুং ভৱেৎ।
অন্যত্র ৱালিতনযাদন্যত্র চ হনূমতঃ ॥ **4.64.13** ॥

ততস্তান্ হরিৱৃদ্ধাংশ্চ তচ্চ সৈন্যমরিন্দমঃ।
অনুমান্যাঙ্গদঃ শ্রীমান্ ৱাক্যমর্থৱদব্রৱীৎ ॥ **4.64.14** ॥

ক ইদানীং মহাতেজা লঙ্ঘযিষ্যতি সাগরম্।
কঃ করিষ্যতি সুগ্রীৱং সত্যসন্ধমরিংদমম্ ॥ **4.64.15** ॥

কো ৱীরো যোজনশতং লঙ্ঘযেত প্লৱঙ্গমঃ।
ইমাংশ্চ যূথপান্ সর্ৱান্ মোচযেৎ কো মহাভযাৎ ॥ **4.64.16** ॥

কস্য প্রসাদাদ্ দারাংশ্চ পুত্রাংশ্চৈৱ গৃহাণি চ।
ইতো নিৱৃত্তাঃ পশ্যেম সিদ্ধার্থাঃ সুখিনো ৱযম্ ॥ **4.64.17** ॥

কস্য প্রসাদাদ্ রামং চ লক্ষ্মণং চ মহাবলম্।
অভিগচ্ছেম সংহৃষ্টাঃ সুগ্রীৱং চ ৱনৌকসম্ ॥ **4.64.18** ॥

যদি কশ্চিৎ সমর্থো ৱঃ সাগরপ্লৱনে হরিঃ।
স দদাৎৱিহ নঃ শীঘ্রং পুণ্যামভযদক্ষিণাম্॥ **4.64.19** ॥

অঙ্গদস্য ৱচঃ শ্রুৎৱা ন কশ্চিৎ কিঞ্চিদব্রৱীৎ।
স্তিমিতেৱাভৱৎ সর্ৱা সা তত্র হরিৱাহিনী॥ **4.64.20** ॥

পুনরেৱাঙ্গদঃ প্রাহ তান্ হরীন্ হরিসত্তমঃ।
সর্ৱে বলৱতাং শ্রেষ্ঠা ভৱন্তো দৃঢৱিক্রমাঃ।
ৱ্যপদেশকুলে জাতাঃ পূজিতাশ্চাপ্যভীক্ষ্ণশঃ॥ **4.64.21** ॥

নহি ৱো গমনে সঙ্গঃ কদাচিৎ কস্যচিদ্ ভৱেৎ।
ব্রুৱধ্ৱং যস্য যা শক্তিঃ প্লৱনে প্লৱগর্ষভাঃ॥ **4.64.22** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে চতুঃষষ্টিতমঃ সর্গঃ ॥